# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

**कक्षा - शास्त्री-३, सेमेस्टर-५** **प्रश्नपत्रम् - ६** **गुणाः - ७०**
**विषयः - पुराणेतिहासः** **कोड - CC-3.5.10** **समयः - ११-०२**
**दिनाङ्कः - ३०.११.२०१६** **ग्रन्थः - महाभारते भीष्मपर्वणि श्रीमद्भगवद्गीतापर्व - १३तः४२ अध्यायाः**

---

**प्रथमान्वितिः ( युनिट - १ )**

**प्रश्नः १ कयोश्चिद् द्वयोः ससन्दर्भं व्याख्या कार्या । ०८**

*(१) अधर्मः क्षत्रियस्यैष यद् व्याधिमरणं गृहे ।*
*यदयो निधनं याति सोऽस्य धर्मः सनातनः ॥*

*(२) एवं राजन् विजानीहि ध्रुवोऽस्माकं रणे जयः ।*
*यता तु नारदः प्राह यतः कृष्णस्ततो जयः ॥*

*(३) यं दृष्ट्वा कुरवः सर्वे दुर्योधन पुरोगमाः ।*
*निवर्तिष्यन्ति संत्रस्ताः सिंहं क्षुद्रमृगा यथा ॥*

**प्रश्नः २ कस्याप्येकस्य समीक्षा क्रियताम् । ०८**

*(१) संजयस्य धृतराष्ट्रं प्रति भीष्ममृत्योः समाचारकथनम् ।*
*(२) भीष्मस्य रक्षार्थं दुर्योधनस्य आदेशः ।*

**प्रश्नः ३ कयोश्चित् द्वयोः टिप्पणी कर्तव्या । ०४**

*(१) दुर्योधनसैन्यवर्णनम् ।*
*(२) व्यूहनिर्माणसन्दर्भे अर्जुनयुधिष्ठिरयोः चर्चा ।*
*(३) श्रीकृष्णस्य अर्जुनं प्रति कौरवसैन्यनाशायकथनम् ।*
*(४) कौरव सैन्यं दृष्ट्वा युधिष्ठिरस्य विषादः ।*

**प्रश्नः ४ प्रदत्तेभ्यः पञ्चानाम् लघूत्तराणि देयानि । ०५**

*(१) पितामहं युद्धे कः व्यापादयामास ?*
*(२) 'जामदग्निः' अर्थात् कः ?*
*(३) कस्य वीर्यं समाश्रित्य दुर्योधन अयुध्यत ?*
*(४) भीष्मः कतिदिनं यावदयुध्यत ?*
*(५) सर्वलोकदुरत्ययः कः ?*
*(६) धर्मादधर्मो बलवानिति कः वदति ?*
*(७) 'कपिध्वजः' कः ?*

**द्वितीयान्वितिः ( युनिट - २ )**

**प्रश्नः ५ कयोश्चित् द्वयोः ससन्दर्भं व्याख्यां कुरुत । ०८**

*(१) गुरुन हत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।*
*हत्वार्थकामांस्तु गुरुनिहैव भुञ्जीयः भोगान् रुधिरप्रदिग्धान् ॥*

*(२) देवान् भावयतानेन ते देवा भावयन्तु वः ।*
*परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥*

(३) *प्रसादे सर्वदु:खानां हानिरस्योपजायते ।*
*प्रसन्नचेतसो ह्याशु बुद्धि पर्यवतिष्ठते ॥*

**प्रश्न: ६ कस्याप्येकस्य सार: दातव्य: ।** **०८**

*(१) अर्जुनकृतं दुर्गास्तवनम् ।* *(२) स्थितप्रज्ञलक्षणानि ।*

**प्रश्न: ७ एकस्य टिप्पणी कार्या ।** **०२**

*(१) अर्जुनस्य विषाद: ।* *(२) कर्मयोग: ।*

**प्रश्न: ८ प्रदत्तेभ्य: द्वयो: संक्षेपेण उत्तरं दत्त ।** **०२**

*(१) अर्जुनस्य कृते कौ पूजार्हौ स्त: ?*
*(२) धीर: कुत्र न मुह्यति ?*
*(३) मात्रास्पर्शा: कीदृशा: ?*
*(४) हृषीकेश: प्रहसन् कमुवाच ?*

## तृतीयान्विति: ( युनिट - ३ )

**प्रश्न: ९ ससन्दर्भं कयोश्चित् द्वयो: व्याख्या कार्या** **०८**

(१) *अपि चेत् सुदुराचारो भजते मामनन्य भाक् ।*
*साधुरेव स मन्तव्य: सम्यग्व्यवसितो हि स: ॥*

(२) *तस्मात् त्वमुत्तिष्ठ यशो लभस्व*
*जित्वा शत्रून् भुङ्क्ष्वराज्यं समृद्धम् ।*
*मयैवैते निहता: पूर्वमेव*
*निमित्तमात्रं भव सव्यसाचिन् ॥*

(३) *सर्वस्य चाहं हृदि संनिविष्टो*
*मत्त: स्मृतिर्ज्ञानमपोहनं च ।*
*वेदैश्च सर्वैरहमेव वेद्यो*
*वेदान्तकृद् वेदविदेव चाहम् ॥*

**प्रश्न: १० कस्याप्यकेस्य वर्णनं कुरुत ।** **०८**

*(१) भगवद्भक्तिमहिमा ।* *(२) भक्तलक्षणानि ।*

**प्रश्न: ११ टिप्पणी लेख्या ।( द्वयो: )** **०४**

*(१) प्रकृतिपुरुषयो: वर्णनम् ।*
*(२) आसुर एवं दैवीसम्पदा ।*
*(३) भगवद्विभूतय: ।*
*(४) विश्वरूपवर्णनम् ।*

**प्रश्न: १२ लघूत्तरं लिखत ।( पञ्चानाम् )** **०५**

*(१) मृत्युसंसारवर्त्मनि के निवर्तन्ते ?*
*(२) जन: क्षीणे पुण्ये कुत्र विशति ?*
*(३) दिवि दिव्यान् देवभागान् के अश्नन्ति ?*
*(४) भगवान् केषां योगक्षेमं वहति ?*
*(५) परमं रूपमैश्वर्यं भगवान् कस्मै दर्शयामास ?*
*(६) कया भक्त्या विश्वरूपं द्रष्टुं शक्यते ?*
*(७) ज्ञानात् किं विशिष्यते ?*

=०=